श्रीगणेशायनमः॥ ॥नत्वागणाधिपंलक्ष्मीश्रीरामंविमलेश्वरं॥मादेहत्युपनाम्नाश्री
नारायणसुतेनवै॥१॥आश्वलायनसूत्रविरोधिबोधायनानुगः॥यकृतीष्टेःप्रयोगोहियथामति
निरूप्यते॥२॥यद्यपीहबुधोन्नीताःप्रयोगाःसंतिभूरिशः॥तथापीहविशेषोयःपंडितैःसविचिन्यतां
॥३॥अथाश्वलायनोपयोगीबोधायनदर्शपूर्णमासप्रयोगोलिख्यते॥तत्रद्वैधकर्मोक्तोयानुवाक्योक्ता
विशेषविधयःकल्पसूत्रोक्तविशेषविधिभिर्विकल्प्यंते॥यथान्वाधानेद्वैधोक्ताविकल्पादितिकेचित्॥सम
नुकल्पेविशेषोक्तोद्वैधाद्युक्तविशेषानयाह्याकांक्षाभावात्कल्पसूत्रस्यमुख्यत्वेनभाति।कल्पेसामान्यो | आ २
क्तोअतुक्तोचद्वैधाद्युक्ताविशेषाःशेषेतनसंबध्यंतइति॥तत्रकर्मांते॥सोयमाहिताग्निःस्वगृह्यातरग्निहोत्रा | १

स्थित्वानुपसादयेदनुग्रहार्थान्नतोपयनीयंपात्रयतितस्याशितोभवतइति॥पित्र्यान्।स्थूलानियज्ञिय
काष्ठानिअग्नियहणसमर्थानिअग्निसमीपेस्थापयेत्॥गोपालः।विकल्पोवपनेतीर्थस्नातावहतवाससौ।
अभ्यक्तौनवनीतेनदीक्षितावाजिनाविति॥तीर्थेहतांबराःस्नाताऋत्विजोब्रह्मचारिणः॥सर्वेप्रक्षालिता
नार्द्रनिर्मलश्वेतवाससः।कल्पः।दर्भास्त्रिधासप्तशएवभेदान्मुखेवनाभावपिगुल्फयोश्च॥यन्मार्जनंतत
वनंततस्नानद्भिःसमुस्योत्तरतोनिरस्येत्॥अपःप्रतीकैस्त्रिभिरंबुपानंत्रिमार्जनंव्याहृतिभिर्यथोक्तं।शि
षंतुमंत्रावमनंयथोक्तमन्येविदुर्मंत्रविपर्ययेण॥अंतेनथाव्याहृतिभिःसमुक्षेदन्यैःपवित्रैरपिरानआ
द्यैः।मंत्रोक्षणंतद्धितंविधित्सेःपत्न्यृत्विजांत्रयमेनदिष्टं।मंत्रप्रोक्षणेकुशग्रहणस्यानुक्तत्वाधर्म्मेन

वकार्यं। पवनादिकंविहाराद्बहिरेवविहारकर्तव्यत्वेप्रमाणाभावात्॥ प्रवेशानिर्गमौसर्वत्रतीर्थेनैवस
र्वैषामिति॥ आवर्त्तनेविहाराभिमुखःसर्वत्र। तथाचधर्मे। प्राग्दक्षिणंसमभिपर्यावर्त्तयत्र
त्यङ्मुखःसद्यमिति। यजमानःपत्न्यश्चयथानुपूर्व्यमुत्क्रामहवनीययोरंतरेणप्रपद्यजघनेनगार्ह
पत्यंप्राग्ग्रीवेषुदर्भेषुप्राङ्मुखाउपविशंतिउत्तरतःपतिःदक्षिणतःपत्न्यः। ऋत्विजश्चैवंप्रपद्यगार्हपत्यो
त्तरतःप्राङ्मुखाउपविशंतिइतिविज्ञायते॥ ततःसर्वैरपिप्राणायामःकर्तव्यःप्राणानायम्यकुर्वीतस
र्वकर्माणिसंयतइतिबह्वृचानां॥ ततोविष्णुध्यानं। तथाचगोपालः। यज्ञाधिदेवतंविष्णुंध्यात्वादौपुरु
षोद्यमाचरेति॥ अथोपव्याहरणं। कल्पादौकर्तुकामंकामयीतयज्ञांगादौयज्ञांगकामामितिप्राकृतान्दर्भा २

न्संस्तीर्यतेषुप्राङ्मुखोयजमानउपविश्यजपतियाःपुरस्तात्स॰ निविष्टमितिमनसात्रिःसंकल्पयतेत्रि
रुच्चैःस्वर्गकामोदर्शपौर्णमासाभ्यांयस्यहुतिनन्मऋध्यतां॰ ओंनथेतिप्रतिवचनमिति। अत्रजपतीत्य
धिकारान्निविष्टमित्येतज्जपएवकेचिच्छ्रुत्यर्थइतिवाक्यमुच्चैःपठंतिनाचिंत्यं। अत्रजपचोदनात्स्वरनिय
मः। अन्यत्रैकश्रुत्यं। यत्सकर्मण्यजपन्यूंखसामस्वितिस्मरणात्। जपानुमंत्रणाभिमर्शनाप्यायनोपस्था
नमंत्रसंज्ञकमंत्रकर्मकरणमंत्राश्चोपांशुप्रयोक्तव्याइत्याश्वलायनः॥ स्वर्गकामइत्यस्यमंत्रत्वादकामेना
पिहुतानुमंत्रणवत्स्वर्गपदंप्रयोज्यं। संकल्पेजलक्षेपआचाराकर्तव्यः॥ ततऋध्यतामितिप्रतिवचनेऋ
त्विग्लंभावितंस्तूयेवाॐ नथेत्येतंऋत्विग्प्रतिवचनं। इदानींतुॐ नथेतियजमानोवदतिनात्रिंमूलमिति

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

नविद्यः॥ ततोदेवताः संकल्पयेत्। ततःप्राङ्मुखमासीनमध्वर्युंप्रत्यङ्मुखआसीनोयजमानोऽस्या
मिध्यामध्वर्युत्वाहृणहतिवृणुयात्॥ एवंब्रह्माणंहोतारमग्नीध्रंचेतिविशेषः॥ आश्वलायनेस्तुस
त्वपरिभाषयाप्राङ्मुखत्वेनैववरणंकर्तव्यमितिभाति वरणं चकृताश्वयज्ञदानं॥ कुशैःश्रोत्रेतुकर्तव्यं
वरणंदंपतीसहेतिसंग्रहवचनात्॥ ततइतिरिक्तेनकालेनावरणंततःसर्वैर्ऋत्विग्भिरिज्याजपःकार्यः॥ बौ
धायनवचनात्॥ अध्वर्युस्तुदेवागातुविदइतिसंत्रंजपेत्कर्मांतवचनात्। यजमानकर्तृकेतन्नाध
नेयजमानएवैतयजुर्हुयंजपेदितिविशेषः॥ अथकिंमूलमितिनविद्यः॥ अथाग्न्याधानं। तत्र
यजमानकर्तृकंअध्वर्युकर्तृकंवेतिसुबोधिन्यांसिध्यतितं। कल्पे। अग्नीनन्वाधास्यामीतिवाचोयमानत्वंतत्रसर्वत्रसमिदादौस्वाहाकारः सिध्यतितत्तद्देवतोद्देशेनचद्रव्यत्यागइ
तिसंसाध्यसकृत्तत्प्रयोगकर्मेस्वाहाकारोनलिखितस्तदभिप्रायंनविद्यः। दर्शाम्याकृत्वाहवनीयमुप
तिष्ठेदितिविद्यारण्येलक्षंतच्चिंत्यं। अत्रविशेषः कर्मांते। अग्नीनन्वाधास्यन्नुपस्थंकृत्वागार्हपत्यमूर्ध्वे

स्तुर न्वाहार्यपचनंग्रह आहवनीयंनिष्क्रम्यदक्षमीनिगदेदिति।उपस्थलक्षणमाभ्वलायनस्मृतौ।
दक्षिणंचोपविश्योरुं वासगुल्फोपरिन्यसेत्। वामोरौदक्षिणंगुल्फंतचोपस्थमुदीरितं।विधारणेवै
स्तुस्वस्तिकासनंवोपवेस्तुपद्मासनमुकंतत्कर्मातत्रविरोधाद्विचारणीय। सर्वत्राविशेषउपस्थासन
मेवविधेयमाभ्वलायनैःप्राङ्मुखत्वंच।तस्मिन्नित्याःपंचभ्येष्टाअंकधारणाचेतित्तरिभाषासत्रान्त
अध्वर्युकर्तृकान्वाधानसमयेतद्ग्निदक्षिणतोयजमानउपविश्य॥अग्नयइदंनममेतित्यजेत्।
यत्रयत्रक्रियेध्वर्योस्तत्रतत्रदक्षिणा॥भवेतांब्रह्मयज्ञानोनचेदन्यत्रतत्क्रियेतिकल्पोक्तेः।नाधोक्षि
तमिंधनमग्न्याधेयादिनिषेधात्प्रोक्षिताःसमिधोयाद्याः। मूलमध्ययोर्मध्यभागेसमिधंग्र

DR. BHAU DAJI LIBRARY

हीत्वाहोमः।मूलमध्यममध्येनसमिधोमस्यलक्षणमितिसंग्रहोक्तेः।अथपरिसमूहनादि।क
त्वेपरिसमूहंति।सर्वतअग्न्यगारेविद्यमानानिलक्षणंपांस्वादीनिसंमार्जनेननिरस्यंति।बहुवच
नमध्वर्युयजमानपत्न्यभिप्रायकं।अत्रसोदकेनहस्तेनेत्यवचनाज्जलग्रहणावारंवारंइत्यः।उ
पवसथस्यरूपंकुर्वंति।तदाहगोपालः।परिसमूहनवारिसमुत्सर्गेहुतभुजांशकृतापरिलेपनं।कु
सुमकाष्ठसमाहरणंव्रतंवदनिरूपमिहोपवसथ्यकं।याजमाने।अथोपवसथीयेहविर्निर्वापेत्यपआ
त्वाग्नेणाहवनीयंपरीत्ययजमानायतनउपविश्यतिरःपवित्रमपआचामतिपयस्वतीरितिअथाह
वनीयेसमिधमादधात्यग्नेव्रतप॰ स्वाहेति।अपआचामतिपयस्वतीरितिमंत्रेणसकृन्नतःस्मृत्युक्तमा

चमनं। द्वैधेतुद्विर्मंत्रेणाचामेत्सकृत्तूष्णींसकृन्मंत्रेणद्विस्तूष्णींमितिवेति। अत्रनयुनराचमन
मितिसुबोधिनी। अथबर्हिराहरणादि॥ अथजघनेनगार्हपत्यंतिष्ठन्नसिदमादत्ते। देवस्यत्वेति
उत्तरेणगार्हपत्यंनिहितस्यासिदस्यादानमापस्तंबमतात्॥ आदायाभिमंत्रयतेयज्ञस्येति। अभि
मंत्रणमाभिमुख्येनेक्षणं। स्पृष्ट्वाजपत्यन्यदीयंतुगार्हपत्यमभिमंत्रयतइत्यादौकथमग्निस्मर
नंस्यादितिचिंत्यं। अभिमर्शनाभिमंत्रणयोश्चकोविशेषःस्यात्। अतोभिमंत्रणमवेक्ष्यजपः। अ
भिमर्शनंस्पृष्ट्वाजपः। अनुमंत्रणंस्मृत्वाजपइतिविवेक्तव्यं। अनुमंत्रणाभिमंत्रणाभिमर्शनाप्याय
नोपस्थानानांमंत्रोच्चारणसमकालंक्रिया। एतदतिरिक्तकर्मकरणमंत्रेषुमंत्रांतेकर्मारभतइत्याश्व

लायनसूत्रवृत्तौ। गार्हपत्येप्रतितपतिप्रत्युष्टमिति। अत्रनिष्ठन्नित्यधिकारादसिदाभिमंत्रणंप्रति
पेतेनंत्वातिष्ठन्नेवकुर्यादितिसुबोधिनी। अथाहवनीयमभिप्रैतिप्रेयमिति। अत्रकेचनमंत्रोच्चारण
समकालमेवगच्छंतितदुक्तपरिभाषाज्ञानविजृंभितं। इत्वाबर्हिरासदइतिवेदंप्रत्यवेक्षते। आहव
नीयसन्निधौस्थित्वादक्षिणतःपरिहृत्यवेदिमवलोकयेत्। अथतांदिशमेतियत्रबर्हिर्वेत्स्यन्मन्यते।
यस्यांदिशिबर्हिर्लाभोनिश्चितःतांदिशमनियमेनगच्छेत्। दर्भस्तंबंपरिगृह्णातियावंतमूलंप्रस्तरा
यमन्यते। देवानामिति। एकमूलप्रभवोदर्भस्तृहस्तंबः। तमसिदेनपरितोलिखति। अंगुष्ठांगुलिन
खयोःसंगत्यायावत्परिमंडलंभवतितावत्स्थौल्यंप्रस्तरस्येतिकर्मांते। दैर्घ्यपरिमाणंतुस्तुगायाम

संमितमिति विद्यारण्याः। अथैनमूर्ध्वमुन्मार्ष्टि वर्षद्भमसीति। एनं दर्भस्तंबं यत्र पर्वदेशोत्पनि
ततऊर्ध्वदेशंऊर्ध्वमुखेनासिदेन केशकीटादिदोषंयथादर्भस्तंबेनभवेत्तथाशोधयति। असिदेनो
पयछति देवबर्हिरिति। असिदंपर्वदेशंआछेदनायप्रयोजयति। आछिनत्त्याछत्तेति। अत्रा ऽयमर्थ
र्थः। आछेदनात्प्रभिमृशतिदेवबर्हिःशातेति। आछिन्नमूलप्रदेशानित्यर्थः॥ सहस्रवल्शाविवयंरुहे
मेत्यात्मानंप्रत्यभिमृशते। आत्मानंउरसिस्पृशतीतिविद्यारण्याः। सर्वेशाएवैनंस्तंबलुनाति। इदंद्वि
यत्रवनूमंत्रकं। आछेदनादिकृत्वासर्वत्रापामुपस्पर्शनंकार्यं। अंगोपस्पर्शनेवस्नदशासंस्पर्शनेन
था। छेदनेभेदनेचैवनिरामेरवननेनथा॥ पैतृकेरक्षसेरौद्रेनैर्ऋतेचाभिचारिके। एतेषुचैवनिमित्तेषु ६

जलोपस्पर्शनंभवेदित्यभियुक्तोक्तेः॥ कल्पेतुषनिरसनादिषूपस्पर्शविधानात्कल्पोपस्पर्शोगो
पस्पर्शादिषुसामान्यपरिभाषाप्राप्तोदकस्पर्शः कृताकृतइतिकेचित्। कृत्वाप्रस्तरंनिदधातिश्रुति
व्याहति। कृत्वाबध्नेत्यर्थः। बंधनप्रकारस्तुअर्धसन्नह्योपर्यर्धमपिसन्नह्योदितिद्वैधे। भूमौतृणादर्भ
निधायतदुपरिनिदधाति। भूमौनिधानेहिभूमिगतकर्दमादिसंपर्केणप्रस्तरस्यदोषोभवेदितिसुबो
धिनी। उत्तरेणगार्हपत्यमनधः सादयतीत्यादौविनात्रविधानाभावाद्यत्किंचिदेतत्। तूष्णीमतऊर्ध्वमयु
जोसुष्टीन्लुनाति। तूष्णीमितिमंत्रोच्चारणमात्रंनिवर्तयति। नतुपरिग्रहादिक्रियाविशेषे। बर्हिर्मुष्टीनां
सकृद्बंधनमितिद्वैधे। अत्रत्रिरन्वाहितदंशुल्बंकृत्वापसलैरावेष्टयतिआदित्याइति। प्रदक्षिणावेष्ट

नसिद्धं शुल्बमेकसरंकृत्वाद्विगुणीकृत्यः प्रदक्षिणमावेष्टयति। शुल्बं च द्वादशभिर्दर्भैः कार्यं। त्रिसंधित्रिवृतं रज्जुं कुर्याद्द्वादशभिः कुशैरतिशौनकौक्के:। शुल्बस्य ग्रंथिकरणाच्चाश्वित्यः। अदित्यादिति मंत्रः शुल्बस्य करणे आस्तरणे वेति विकल्प इति कर्मांते। तदुदाहरणं निधायतस्मिन्नस्तरं संभरति सुसंभृतेति। संभरणे प्रकारत्रयमुक्तं द्वैधेतत्र पूर्वमंत्रेण प्रस्तरं संभृत्य पश्चात्तृणीमुष्टीतरसंभरणमित्यापस्तम्बवचनं कल्पानुगुण्यायुक्तमिति भाति। सन्नह्यतीति तृणैः संनहनमिति। सन्नह्यति शुल्बस्य लाग्रयोर्मेलनरूपं बंधनं करोति। ग्रंथिकरोति पूर्वानुवृत्तिः। लोकवत्सिद्धतृणभारबंधनवत्ग्रंथिकरणमितिसुबोधिनीये। सनेमाम्यादिति पश्चात्त्वां च मुपगूहति। तदधः पश्चाद्भागेन त्वां च ग्रंथिं गमयति। यं

ष्युपगूहनेपुरस्तात्त्वंचमितिशाली किमतमाश्वलायनेनादर्नेत्यस्त्वसूत्रपरिभाषाविरोधात्। अथैनमुद्यच्छतदंद्रस्येति। शिरसिनिधानायऊर्ध्वदेशंनयतिदक्षिणहस्तेनैवअनादेशेदक्षिणंप्रतीयादित्याश्वलायनोक्तेः। मंत्रलिंगाध्वर्युभ्यामुद्यच्छेदितिकेचित्। तन्न। असिदादानादावपितथापत्तेः॥ शीर्षन्नधिनिधनेहस्यतेरिति। अत्राधिशब्दग्रहणात्तृणवस्त्रादिव्यवधानेनशिरसिनिधानमितिविद्यारण्याः। एत्युर्वंतरिक्षमिति। पुनरागच्छतीत्यर्थः। स्योनस्तेगार्हपत्यमनधःसादयतिदेवमितिस्योनशकटेवाःसादनमितिबोधायनः॥ तदुपरीवनिदधातियत्रगुप्तंमन्यते। स्पष्टं। तूष्णींपरिभोजनीयादीँस्तुनातिपरिभोजनीयानिप्रस्तरबर्हिर्मुष्टिव्यतिरिक्तदर्भकार्यसादनानि। एतेष्वेववेदार्थोपिमुष्टि

नि

रवगंतव्यः। बर्हिर्लवनकालएवपरिभोजनीयानांलवनमितिसुबोधिनीभाष्ययोः।अत्रपरिग्रहादिक्रियानिवृत्तिरपातिभाष्ये। सकृद्दात्तिन्नंपितृभ्यआत्तिनत्ति।पितृपिंडयत्तार्थं।अस्यापिबर्हिर्लवनकालएवमंत्रावृद्धर्लवनं।अत्रकेचनपरिभोजनीयवेदमुष्योरपिबर्हिषासहोपरिनिधानंनेकुर्वंतितदप्रमाणकं।अथतथैवत्रिरन्वाहितंश्रुन्ध्वंकृत्वाएकविंशतिदानमिध्मंसन्नह्यतिमंक्ष्योरूपमिति।अत्राविशेषेणदानशेषादानात्सर्वेषांसमित्परिधीनामेकदानसंभवत्वंद्योतयति।पालाशःखादिरोवेध्मस्नयोरभावेयत्तियानांदक्षाणामितिपायश्चित्तकांडे। बाहुमध्यमितोमध्यमद्वयोर्बाहुमात्रोमर्वेवाबाहुमात्रःपरिध्यर्यतिहैधे। द्विचतुरंगुलोबाहुरितिसंस्काररत्नमालायां। समि

दायामप्रमाणंप्रादेशमात्रमितिकर्मांते।प्रादेशमात्राःसमिधःस्युरिध्मोगृज्जांघाविस्तारइतीरयंति।स्थूलाअणीयांसइतित्रयोन्येवाहुप्रमाणंपरिधित्रयंतदितिकल्पः।अत्रबर्हिराहृतेध्मछेदनमितिसंप्रदायः।अत्रेध्मप्रवृश्चनानांसंग्रहणंबर्हिषामिवनिधानांनेकर्मांतियाज्ञिकोपदेशः।पूर्वमेवाहृतबर्हिषइध्मस्यवयनुष्करणमात्रंवा।आहृतंवायनुषाकरोतीत्युक्तत्वात्।लोगाक्षिरापः।छिन्नोपिष्टेतथालूनेसान्नाय्येमार्तिकेतथा।पश्चान्मंत्राःप्रयोक्तव्यामंत्रायज्ञार्थसाधकाइति।वदंकरोतिवत्सज्ञंपशुकामस्येत्यादि।शायिनवत्सज्ञानुसदृशोवेदः।वत्सज्ञः।दर्भमुष्टिंगृहीत्वाग्रेप्रदक्षिणमावेष्यकिंचित्प्रदक्षिणमावेष्टनेनद्विगुणंकृत्वाद्विगुणप्रादेशानंतरमेवश्रुन्ध्वेनबध्नाति।अत्रापस्तंबः।श्रुन्ध्वास्तादेशो

परिवास्यवेदपरिवासनानिनिदधाति। शुल्वेनबध्नातनऊर्ध्वंप्रादेशमात्रेसमानेछिनत्तिछिन्ना
निचाग्राणिवेदपरिवासनानिभवंति। वेदिकरोतिप्रागुत्तरात्परिग्रहात्। इदमग्नावास्याविषय। अथा
पराग्नेःपिंडपितृयज्ञेनुवर्तंते। स्पष्टं। अथप्रातर्हुतान्निहोत्रेहस्तोसंमृशतेकर्मणेवामिति। अत्रस्मार्तो
जलस्पर्शः। द्वेधे। उत्तरेणाहवनीयंतिष्ठन्पाणीसंमृशतीतिबौधायनः। उत्तरेणगार्हपत्यमितिशाली किः।
नलंपरिस्तीर्णाएवैतेऽग्नयोभवंतियद्यु वाअपरिस्तीर्णाभवत्याहवनीयंतेधायेपुरस्तात्परिस्तृणात्यथद
क्षिणतोथपश्चादथोत्तरतएवमेवान्वाहार्यपचनंपरिस्तृणात्येवंगार्हपत्यं। अत्रविशेषमाहापस्तंबः।
उदग्ग्रैःप्रागग्रैश्चदर्भैरग्नीपरिस्तृणात्युदगग्राःपश्चात्पुरस्ताच्चेति। दक्षिणोत्तरैरुत्तरैरधरैरित्याचा

रस्तुदक्षिणःपक्षउपरिष्टाद्भवतिअथस्तादुत्तरइतिभरद्वाजसूत्रमूलकः। अत्रदर्भैरितिबहुवचना
त्कपिंजलन्यायेनप्रतिदिशंदर्भत्रयं। अथाग्नेणगार्हपत्यंतृणानिसंस्तीर्यतेषुहेहूंन्यंचियन्तायुधानि
संमादयति। स्फ्यंचकपालानिचेत्यादि। अथासनकल्पना। धर्मे। दक्षिणेनाहवनीयंब्रह्मायतनंतद
पेरेणयजमानस्योत्तरेणाहवनीयंग्रणीतायाउत्तरांश्रोणिमुत्तरेणहोतुरुत्करआग्नीध्रस्यजघने
नगार्हपत्यंपत्न्यास्तेषुकालेकालएवादर्भात्संस्तीर्यएकैकस्योदकमंडलुरुपान्तःस्यादाचमनीया
र्थइतिअथर्युणापि त्वकर्मकालेस्मार्तेपरिभाषयाकुशाद्यासनंस्वीकार्यपात्रासादनोत्तरमेवास
नपरिकल्पनमितिज्ञापकंवर्णितंसुबोधिन्यां। भाष्येप्येवं। एतेनशेषोक्तंपात्रासादनात्प्रागासनपरि

बौ॰द॰ कल्पनंनिर्युक्तिकमितिभाति। ब्रह्माणंदक्षिणतउपवेश्य। आवाहनीयादिनिशेषः। इदमुपलक्षणं। इ
१० दानीयज्ञमानेनापित्वायतनउपवेशनंकार्यं। प्रयोगकालेतत्रैवस्थातव्यत्वात्। दृष्ट्वाऽस्तृणानिसं
ततांगार्हपत्यादाहवनीयात्। गार्हपत्यायतनादारभ्याहवनीयायतनंआमर्यादीकृत्येतिवैजयंती। सो
मएवदृष्ट्वास्तरणंनदर्शपौर्णमासादिषुनिशालीकिः। बर्हिषःपवित्रेकृत्वेतिदेशमात्रेसमेअग्नि
न्नाग्नेअनवच्छिन्नेइमाधितिं। बर्हिषःस्तरणार्थात्। कल्पेति। वेद्यर्थमुद्धृत्यपवित्रदर्भाविति। दृष्ट्वायाः
परिभोजनीयेभ्योवेतिद्वैधं। अत्रइमाधितिमंत्रांतरकल्पेपवित्रेकृत्वाऽः स्तरात्। करणप्रकारस्क
मएकाष्ठंतृणंवांतर्धायसमोमाग्रेऽअंतर्गर्भरहितोदर्भौअग्रेप्रादेशमात्रावदेषयन्धृत्वातत्रकाष्ठे

शे

DR. BHAU DAJI MEMORIAL

नासिदेनवाछिनत्ति। ननखेन। तथाचसत्याषाढः समावर्त्तछिन्नाग्रौ ——प्रादेशमात्रौदर्भौपवि
त्रेकरोतिपवित्रेस्थो॰पुनात्विति तृणंकाष्ठंवांतर्धायछिनत्तिननखेनेति। एवंचबौधायनोक्तस्यकु
तइत्यस्याछिनत्तीत्यर्थः। सत्याषाढालुरोधात्। धातनामनेकार्थत्वाच्च। केचनपवित्रेकृत्वाभूमौनि
धायादत्तइमाधितिमंत्रेणेत्याहुस्तत्पवित्रकरणेविनियुक्तमंत्रस्यपवित्रादानेकथंमानिरितिविचार
णीयं। अथैनेअङ्गिरस्वतीमार्ष्टिपवित्रेस्थइति। मूलादारभ्याग्राभ्यांमार्जनंकरोति। नच्चांगुष्ठोपकनिष्ठिका
भ्यांकार्यं। गृह्णीत्वांगुष्ठोपकनिष्ठिकाभ्यामित्याश्वलायनोक्तेरितिविचारण्येतत्कृतदाज्योत्पवनप्र
करणस्याश्वलायनगृह्यसूत्रंकथमत्रप्रमाणमितिसुधीभिर्विचारणीयं। पवित्रयोर्ग्रंथिकरणमं

चाराग्निसुबोधिनी। अथो नरेणगार्हपत्यसुपविश्यकुं संवाचमंवाग्रणीनाग्रणयनंया
चति। परिकर्मिणमितिशेषः। परिकर्मिन्स्रुणीनाग्रणयनमाहरतियाज्ञवल्क्यः। इदानीतुअध्वर्युःस्व
यमेवस्रुग्रणीनाग्रणयन्नादायगार्हपत्यसमीपंगच्छतितत्कल्पसूत्रविरुद्धंस्पष्टमेव। तस्मिंल्लिरःप
वित्रमपआनयन्नाहबर्हिस्तीति। उदगग्रंपवित्रेचमसंनिधायापआनयति। याज्ञिकास्तुवामेनप
वित्रेश्रुवाःपआनयंतितत्रमूलमृग्यं। अत्रकल्पेयजमानवाचयज्ञेत्येवोक्तंतुअध्वर्युस्रुग्रणीपि
वाग्नियमनंसुबोधिनीभाष्ययोः साधितं। अत्रधर्मेविशेषः सोनयुक्तैस्त्रिविधवृद्धैर्मुनिभिरन्यो
न्येवाश्रमिभिर्बहुश्रुतैर्वांतैर्दंतान्संधायांतर्मुख एवयावदर्थंसंभाषेतनमंत्रलोपोभवतीतिवि

ज्ञायतइतिप्रस्तरः समंप्राणेधारयमाणोविषिंचन्नूहत्योत्तरेणाहवनीयंदर्भेषुसादयित्वादर्भैः प्र
छाद्य। प्रस्तरअनुज्ञातःब्रह्मणेतिशेषः। प्राणेःसमंनासिकयातुल्यं। अथवाप्राणेःसहस्रुणींधारय
माणःनियतंप्राणइत्यर्थः। अविषिंचन्नित्येतेनैवपूर्णतांद्योतयति। कर्मीते। स्रुणीताःस्रुणयन्नध्वर्युः
अनयापःस्रुणयामीतिमंत्रेणस्रुणयेत्। अनयेतिकरणत्वेननिर्दिष्टांपृथिवीमनसाध्यायेत्। अनया
पःस्रुणयामीतिमंत्रघटितःपाठोयुक्तःअयंस्रुणीतानयनमंत्रः अतोमंत्रांतेस्रुणीताभिःसहग
मनारंभः। केचनाहवनीयोत्तरतःस्रुणीतास्थापनेमंमंत्रंयोजयंतितदन्याय्यं। एवंपूर्णपात्रंऊर्ध्वाधो
हस्ताभ्यांधृत्वानयंतितदपिदक्षिणंप्रनीयादनादेशइतिपरिभाषाज्ञानमूलकं। दर्भैःप्रच्छाद्यपवि

बौ० द० १२

त्रमादायप्रदक्षिणमाहृत्यंप्रत्यंङ्जुहुया दन्तेदक्षिणेनाग्निहोत्रहवणीमध्येनभूर्पवेषायत्वेति।प्र
णीताच्छादनेदर्भैरितिबहुवचनात्त्रयवादर्भाः।कैंजल्कन्यायेनत्रयोवा।एवंसर्वत्रबहुवचनेद्रष्टव्यं।
आग्निहोत्रहवणीभूर्पवेषायत्वेतिमंत्रःभूर्पवेषानंपरिभाषामिधंत्तेयं।वेषायत्वेतिमंत्रःभूर्पवे
नऐवेतिभाष्यसुबोधिन्योर्विस्तरेणानिरूपितं।केचनोभयार्थंमंत्रमित्याहुः॥गार्हपत्येपतिनपति
प्रत्युष्टमिति।दक्षिणेनोभयंघातिनपतिअविशेषात्।प्रतिनपनेवपवेषानंपरिभाषामिधं।यद्युवे
नानोभवतिजघनेनगार्हपत्यंस्थंनिदधातिस्फ्योपरिपात्रीपात्रांध्रुवेडाशीयानावपत्यथपूर्वार्धपा १२
त्रांअभिमृशतिधरसि० मात्वाहिंसिमित्यथध्रुवेडाशीयान्लोष्टंनमित्रस्य० सिषमिति।उक्त्वानायंतत

णंवाकिंशारुवातिरस्यतिअथापउपस्पृश्यदशहोतारंव्याख्यायहविर्निर्वप्स्यामीतियजमानमामंत्र्यप
वित्रवत्याग्निहोत्रहवण्यातिषेपत्योंनिर्वपेतियजमानोनुजानाति।शाकटपक्षस्यावाराभावात्तत्सीय
सूत्रव्याख्यानंनलिखितं।अत्रस्रुग्यपात्रोंत्रागग्रनिधानंपरिभाषिकं।शेषादिप्रयोगेतुउदग्ग्रंस्रुग्यंनि
दधातीत्युक्तंतन्मूलंगवेषणीयं।अत्रशाकटपक्षेशाकटप्राग्भागेभूर्पादिनिधानवचनात्प्राग्भ्रस्थाना
पत्याधर्मलाभात्प्रत्रीपूर्वभागेभूर्पंतदुपर्यग्निहोत्रहवणीतदुपरिपवित्रेनिधायाभिमर्शनंकार्यमिति
सुबोधिनी।किंशारुत्राहिभ्रूकंनेकेत्यादिशानिरसनमितिसंप्रदायः।अत्रापस्पर्शआवश्यकःप्रकरणपा
ठात्।चितिःस्रुगित्यनुवाकोदशहोतृसंज्ञकः।वाचस्पतेविधेनामन्नित्यादिकोग्रहः।तेनसहितःसग्रहः

तद्ग्रहिनोऽग्रहः। तत्रहोमार्थेस्रुस्वाहाकारः सग्रहश्च। अहोमार्थेग्रहस्वाहाकारयोर्विकल्पइतिहेधे। यज
मानपदरहितंहविर्निर्वपस्यामीत्येवंवदेत्। यावद्वचनंवाचनिकमितिन्यायात्। अतएवविधारण्यगृयो
गकमेएवमेवलिखितं। अन्वानिर्वपेभागयपवित्रवत्यामिहोत्रहवण्यानिर्वपः। तस्यनित्याःपांचश्चे
ष्टाइत्याश्वलायनोक्तेः। भाष्यकारादिभिस्तुदर्गयपवित्रवत्यानिर्वपनोक्तंतत्सामादिकमितिभाति। अ
थनिर्वपतिदेवस्यत्वाऽभ्यामग्नेर्जुष्टंनिर्वपामीतिश्रोत्तेनयजुषासक्तस्यौमिति। क्वचिदक्षिण्यृष्टिना
पुरोडाशीयानोप्यदक्षिण्येनैवतयाभ्रूर्पेनिर्वपति। भाष्येतुअग्निहोत्रहवणीसव्येनयज्ञोक्तात्तस्यापुरोडा
शीयानोप्येत्यादिलिखितंतदवेक्ष्यसव्यहस्तस्पर्शस्यानुचितत्वात्भ्रूर्पेहवनीनिधायेतिवेत्यानसो

क्तेश्चविचारणीयं। एतामेवप्रतिपदंकृत्वाग्नीषोमाभ्यामितिपौर्णमास्यामिंद्रायवेमृधायेतिचेंद्रा
ग्निभ्यामित्यमावास्यायामसन्नयतइंद्रायेतिसंनयतोमहेंद्रायेतिवायदिमहेंद्रयाजीभवति॥
एतामेवप्रतिपदं। प्रकारोपदेशंकृत्वाऽग्नयइतिपदस्थानेऽग्नीषोमाभ्यामित्यादिपदमुच्चार्य
निर्वपेत्। निर्वापप्रभृतिप्रथमपुरोडाशावदानप्रभृत्याज्यभागप्रभृतीडावदानप्रभृतिवापंचाव
त्तंकुर्यादितिपंचावत्तिविषयेद्वैधस्यात्रार्थः। त्रिर्यजुषाहिन्नूष्णोपंचावत्तिनांसर्वानेवयजुषेतिकात्यायनः।
आश्वलायनैःपंचावत्तिभिरवदानंतएवपंचावत्तंकार्यंतत्सूत्रेणथोक्तेः। कल्पसूत्रेचतुरवत्तस्यैवविधा
नात्केवलंपंचावत्तिनोप्याश्वलायनाश्चतुरवत्तमेवकुर्वंतितत्रश्राद्धादितिपंचावत्तिनामितिस्वसूत्र

बो॰ द॰ १५

परित्यागस्यायुक्तत्वात्स्रुवादिकमेव। अत्राग्नेरनंतरमुपांशुदेवतोक्ताभ्यवलायनैः। अंतरेणाहवनीयं विष्णुमुपांश्वैतरेणेति। उपांशुयाजस्य चर्वाज्ययोरन्यतरद्द्रव्यमिति हैधार्थः। तत्र चरुपक्षे आग्नेयानंतरं निर्वपः। यजमानोयथादेवतं निरूप्यमाणमनुमंत्रयतेऽग्निꣳ होतारमिति नियमकृत्। यजमानसत्रेतुरुतमभिमंत्रयतेग्निꣳ होतारमिह॰ अस्मेति नदुदित्वाग्नेयमुक्त्वाह विधुक्तहस्तुकं। अथनिरुप्तानभिमृशतीदं देवानामिति। इदमुनः सहनियेतिशिष्टाभवंति। अभिमृशतीतिशेषः। पात्रागतानित्यर्थः। एकीकरोतिस्मात्याहतिनिरूपेषुक्षिपतीत्यर्थः। सुबोधिनीकारस्त्वेकीकरोतीतिसूत्रमदृष्ट्वास्मात्याहतिमंत्रस्यपुनरतिशिष्टाभिमर्शनएवविनियोगमुक्तवान्। अथाहवनी

१५

यमीक्षतेसुवरभिति। अथगृहानन्वीक्षतेदꣳ हंतामिति। गृहान्। यजमानस्यमहानसादीन्अग्न्यगाराणिवेतिसुबोधिनी। अथैनानादायोपोत्तिष्ठतिएत्युर्वमिति। एतान्अग्निहोत्रहवणीमूर्षसाहतान्ब्राह्मणेतिसुबोधिनी। उत्थानंतूष्णींगमनेमंत्रः। एत्योत्तरेणगार्हपत्यमुपसादयत्यादित्याइति। उपसादयतीत्यत्रानधःसादयतीतिविद्यारण्यभाष्यपुस्तकेकचिद्दृश्यतेतल्लेखकप्रमादकृतं। गार्हपत्यमभिमंत्रयतेग्नेहव्यमिति। उत्तरतउपविश्यभिमंत्रणमितिभाष्ये। अत्रोत्तरतउपवारोविहारइतिमूलंभाति। अथैतस्यामेवस्रुचिनिरः पवित्रमपोनाग्राभ्यांपवित्राभ्यांत्रिरुत्पुनाति। देवोवः॰ रश्मिभिरितिषड्भिरिति। एतस्यामेवेति। स्रुक्कायामित्यर्थः। तथाचापस्तंबः। स्रुक्कायामग्निहोत्रहवण्यामपआनी

येनि। स्रुग्विलेतिरः पवित्रंनिधायाद्भिः पूरयेत्। केचनवामेनपवित्रंधारयंतितत्प्रमादिकमेवप्र
तिपादस्तुत्यवनाश्चित्तं। अथवापतिपादस्तुत्यवनस्यश्चित्वमिति। अस्मिन्पक्षेसकृन्मंत्रेणहिरण्यहि
रितिपरिभाषातेया। उत्पवनपक्षेगोदुह्यकारिकायां। अंगुष्ठोपकनिष्ठाभ्यांपवित्रेतेअसंहते। गृह्
णीतानपाणिभ्यांस्रिः प्रायुक्त्यतेत्यपरेति। अथैनाउन्दहत्यन्तुपोनिष्ठत्यापोदेवीरिति। प्रणीताअपः
कृत्वैकुर्वन्त्युनिष्ठतिअथवाउन्दहत्यन्तिष्ठतिएतन्मंत्रवत्प्रोक्षणंकुर्वन्नेवोपोनिष्ठति। अथप्रणीतेभ्
योनेउधानं। हुतोपेतुमंत्रसमकालं। अद्भिरेवापः प्रोक्षतिप्रोक्षितास्थप्रोक्षितास्थेतित्रिरिति। प्रणीता
द्भिः प्रणीनापः प्रोक्षति। प्रोक्षण्युद्धरंकिंचिलात्रांतरेत्यकृत्यतेनप्रोक्षणं। प्रोक्षणंकेवलहस्तेनैव

सपत्रेविष्णोतिविशेषाश्रवणात्। तथाआसनेनैवप्रोक्षणं। विशेषाविध्यभावेआसनतायाः पारिभा
षाप्राप्तत्वात्। आधुनिकास्तुतिष्ठन्नेवपुनः पुनस्तदेकदेशंगृहीत्वासपवित्रपाणिनाप्रोक्षणंकुर्वंति
तदयुक्तं। अत्रमंत्रेवीप्साश्रवणान्मंत्रकर्मणोस्त्रिरावृत्तिः। उत्तानेनतुहस्तेनकर्तव्यंप्रोक्षणंभवोद्यत
प्रोक्षणलक्षणंहेयं। अथपुरोडाशीयान्प्रोक्षतिदेवस्य त्वाग्नयेजुष्टंप्रोक्षामाग्नीषोमाभ्यामनुष्वा
अनुष्वाइतियथादेवतंत्रिः। अथसकृन्मंत्रेणहिरण्यहिरितिसर्वत्रैवंकर्मावृत्तावित्याश्वलायनपरिभाषात
शालीकिमनमप्येतत्संवादेवा। उत्तानानिपात्राणिकृत्वाप्रोक्षतिशुंधध्वमितित्रिः। सहव्येस्तेनप्रोक्षणी
र्गृहीत्वादक्षिणेनपात्राण्युत्तानीकृत्यप्रोक्षेत्। अतिशिष्टाः प्रोक्षणीर्निधाय। अत्रापस्संवः। प्रोक्षणी

शेषमग्नेणगार्हपत्यंनिधायेति। प्रोक्षणीनिधानंचप्रागयनवत्। विशेषाश्रवणात्। स्मार्तोऽग्निकास्तु
उदग्गयनवन्निधानंकुर्वंतितत्परिभाषाविरुध्यत्वाद्ध्येयं। कृष्णाजिनमवधूनोत्यूर्ध्वग्रीवमुदञ्चंत्यव
धूतंः। नयहतिनिधिः। उदञ्चंत्यूर्ध्वमुत्क्षिपतीत्यर्थः। नचदक्षिणाग्नावविशेषाश्रवणात्। आधुनिका
स्तुस्मार्तवदुदस्यंत्यवधूनंतितत्परिभाषाबाधादयुक्तं। कृष्णमृगाजिनंसव्येनयोवादेशेनलोमावा
गृह्यत्वादक्षिणेनावधननं। तथाचकल्पसारः। ग्रीवापदेशेपरिग्रह्यसव्येनाहत्यधूनित्वाणंशिरोन
मिति। अथैनंपुरस्तात्स्वनीचीनग्रीवमुत्तरलोमोपस्तृणात्यहिंसायै। यथैनंपर्याहृत्यपृष्ठाद्दक्षिणग्रीवं
नग्रीवमुत्तरलोमोपस्तृणातीति। आस्तरणदेशश्चस्वयंतंतनुसाराद्गार्हपत्यादुत्तरतउत्करादेशोवा। देश

DR BHAU DAJI MEMORIAL

विशेषः। कृष्णाजिनस्यास्तरणइतिसहस्माहबौधायनोः विस्रजन्नेतत्कर्मकुर्यात्कृष्णाजिनावधूनना
द्धास्तरणादेवमुलूखलाध्यूहनादाषुरोडाशीयानामावपनादेवंमुसलस्यावघातादभ्रूर्पस्योपोहनादेवमधि
वपनादाप्रस्कंदनादेवंकपालोपधानादाधोगदेवंप्रस्तरआस्तृणंसादनादेवमभ्याधानादारवननादेव
मौदुंबर्याआभिहोमादेवंयूपआपरिव्ययणादितियथोपपादमेवैतानिकर्माणिकुर्यादितिशालाकिः। ए
तानिकृष्णाजिनास्तरणादीनियथासंभवंकुर्यात्। अविसर्गपक्षेननियतइत्यर्थइतिशालाकिमतं। तस्मि
न्नुलूखलमध्यूहतिअधिषवणमिति। तस्मिन्नुरोडाशीयानावपत्यग्नेरिति। सर्वेषांपुरोडाशीयानामाव
पनंसकृदेव। मंत्रोपिसकृत्। यद्वाचतुरवत्तिनांचतुरावपनंपंचावत्तिनांपंचावपनमितिहेधार्यः। अस्मि

स्फ्येनेत्यादिनोप्यावर्त्तनीयइतिविद्यारण्याः सहावापपस्फेभ्यूर्षेणावपनं। हस्तेनावपनेनसहत्वासंभवात्।आ
धुनिकास्तुसृष्टिमात्रंसकृदेवावपंतिनन्मूलंनपश्यामः।मुसलमवदधात्यद्रिरिति। अथहविष्कृतमाव
यतिहविष्कृदेहीहविष्कृदेहीतिविः।हविष्कृत्पत्न्यःपत्नीवा। अथदृषदुपलेदृषारवेणोच्चैः समाहंतीषु
साव॰ जेष्मोतिविरिति।दृषारवः पाषाणः।शम्यावासमाहननमितिशाल्लीकिः।अत्रैषवक्तव्यः कर्मा
ते।उच्चैः समाहतवाआह। समाहननसंख्यातत्रैव।द्विर्दृषदिसकृदुपलायांनवकृत्वः संपादयतीति।अ
त्रदृषदुपलयहणंसर्वेषायत्रपात्राणामुपलक्षणं। दृषदुपलयोरवसंत्रकंपात्राणांत्रसत्रकमाहननं
द्विर्दृषदिसकृदुपलायामितिविधायमंत्रकिंपात्राणांत्रसत्रकीविनियोगाद्दाहननत्रयेसकृन्मंत्रइति

त्रिवारंमंत्रमिछंति।अत्रबहवोविकल्पाःभाष्यसुबोधिन्यादौद्रष्टव्याः।अत्राहननकर्तृग्नीध्रइ
तिविद्यारण्याः।अवहत्योतुषान्कृतोनरतःभूर्षमुपयछतिवर्षहध्वमिति।तस्मिन्नुरोडाशायां
नुहूपति।प्रतित्वेति।अथोदगपराहत्यपरापुनातिपराकृतमिति।उदङ्पराहत्यउदञ्चमुरोभूत्वेत्यर्थः
पर्यावर्तनंचदक्षिणाहस्ताकर्तव्यं।केचनसव्याहस्तापर्यावर्तनंकुर्वंतितत्सव्याहदुदंडाहत्येतिवदन्नविरो
धाश्रवणाच्चिंत्यं।भूर्षेणतुषान्नंदुलेभ्यःपृथक्करोति।सव्येनतुषानुपहत्येमांदिशंनिरस्यानिरस्यामि
ति। इमांनैर्ऋतीर्दिशमितिभाष्यसुबोधिनीकारादयः। वायव्यामितितंत्रकृत्।अथापउपस्पृश्य। अत्रो
दकस्पर्शआवश्यकः प्रकरणपाठात्।विविनक्तिवायुरिति।विवेकस्तंडुलत्वीत्योःपृथक्करणं। पात्र्यांनंदु

लान्प्रस्कंदयतिदेवोवृद्धिः। द्वीहिभ्योविविक्तांस्तंडुलान्दात्रेण्यामावपति। अवहंत्यैप्रयच्छन्त्याहत्रिष्क
लीति। तंडुलेभ्योविविक्तान्हीनवहंत्यैप्रयच्छन्त्याह। फलीकरणंनामभ्येत्याद्रकदोषापनयनं।
त्रिष्कलीकृतान्त्याहुरित्यनेविधानात्फलीकरणंबहुकर्तृकमपीतिभाष्यं। सुबोधिनीकारस्तु। विविन
क्तीतिकणांस्तंडुलांश्चनतुत्रीहींस्तंडुलांश्चअवहत्योतुषान्कृत्वेत्यत्रैवकृत्वतुषोऽमनेनपरापघनेन
चसर्वतुषनिरासान्। फलीकरणंतुकणनिरसनेनसुफलीकरणायेत्याह। पर्वैकभाष्यंतुपूर्वापरवि
रुद्धंस्पष्टदृष्टव्यं। प्रयच्छन्त्याहेतिदत्तंग्रहीष्यतीत्यर्थः। अवहननकर्त्रीघट्टीदासीवेतिश्रुत्यर्थः। त्रिष्क
लीकृतान्त्याहुस्त्रिष्कलीकृतानिति। फलीकरणान्त्सन्तानान्निरधात्। त्रिष्कली०दितिहतिंतंडुलप्रस्कन्द

नंतंडुलोकनिनयनांतंवाकर्मकुर्यादितिसुबोधिनी। अथप्रोक्तेपुत्रिष्कलीकृतेषुतेषुतेनैवकृष्णाजिनमवधूनो
त्यर्थेश्रीवसुदंडाद्यावधूतं० इतित्रिरिति। स्पष्टं। अथेनसुरत्ना०वेतिनीति। गतार्थं। अधिवपनास्त्र

णेप्राचीनग्रीवमधोलोमेत्योपमन्त्रयते। तस्मिन्नुदीचीनकुंभांश्रपयतिदिवःस्कंभेति। कुंभास्थ
लघदेवाः। तस्यांप्राचीदृषदमध्यहतिधिषणासीति। प्राचीप्राचीनायांपश्चाद्ग्रीवायधोन्त्यंभवतितथा
स्थापयति। दृषदुपलामध्यहतिधिषणासीति। तस्यांधुरोजाशीयानधिवपतिदेवस्य० यथादेवता। अधि
वपतेधान्यमसीति। अधिआधिक्यायहविषोवदतिमंत्रंधान्यमसीतिहतिसुबोधिनी। भाष्ययोः। अस्मि
न्यज्ञेधान्यंदत्साजपः। अभिमन्त्रयजपतीतिकेशवतन्त्रकृतौ। अत्रमूलं। यथादेवतमधिवपते अभिमन्त्रय
जपतिधान्यमसीतिएवंप्राचीनकुल्यसूचपुलकेदापयतेइतिपरंतु अयंपाठोव्याख्यातृभिः किमितिन
संगृहीतइतिनजानीमः। पिंषतिघाणायत्वापानायत्वाव्यानायत्वेति। पिंषति। पेषणेननिष्पादयतिपि

ष्टानि। अत्रप्राणायत्वेत्यादिरंकोमंत्रइतिसुबोधिनी। द्वौधेतुप्राणायत्वेतिप्राचीमोहेदपानायत्वेतिप्रती
चीव्यानायत्वेतितिस्रश्चोकषेदिति। उपलामितिशेषः। बाहूअन्ववस्तेनदार्षदमिति। कृष्णाजिनेपिष्टा
निप्रस्कंदयतिदेवोवदाति। हविःपिष्टेप्रयच्छन्नाहसंवपंतीति। पिष्टेपत्नीदात्येवा। प्रयच्छन्पेषणार्थंकृ
ष्णाजिनेस्थितानिपिष्टानिपिष्टोहपन्योअन्यस्मिन्पात्रेवागृह्णात्प्रयच्छन्नाहसंप्रेष्यति। असंवपंतीपति
तानभक्षिपंतीयथानपतंतितथेत्यर्थः। हविःपेषिकाअतिसूक्ष्माणिपिष्टानिकृत्वाकृष्णाजिनेप्रस्कंदय्या
पयेत्। कृष्णाजिनात्पिष्टानीत्युत्तरत्रवचनात्। अशक्तौपिष्टनिर्वपेत्तु अवघातादितत्तत्साधनेनापिष्ट
मेवतथासंस्कुर्यात्। आहतंनायज्ञुषाकरोतीतिलिंगदर्शनात्। उपांशुयाजस्यचतत्पत्नेप्रागधिवपना

चषुरोजारीयविभागः। अथकपालोपधानादि। अथैतानिकपालानिप्रक्षालितानि जघनेनगार्ह
त्यमुपसादयति। अष्टौदक्षिणतएकादशोत्तरतइति। एतानीतिआधानप्रभृतिपात्रचतुष्कपालाना
मपिधारणद्योतयति। प्रक्षालितानीत्यनेनासहनात्सागेवप्रक्षालनंगम्यते। जघनेनगार्हपत्यायतना
त्पश्चिमदेशे। कपालानांसंस्त्योपसादनेलोकयोर्थमुपदिष्टं। प्रदर्शनार्थश्चैतत्। सर्वत्रोपयोज्यद्रव्याणां
प्राग्विनियोगात्। संनिधापनंकार्यमिति। एवमविलंबः कर्मणोभवति। वक्ष्यमाणंसमंत्रकोपधान
मप्यायतनात्पश्चिमदेश एवेतिविधारण्याभिप्रायः। कपालपरिमाणमाहगोपालः। तुरंगखुरवि
स्तारंत्र्यंगुलोर्ध्वप्रमाणकं। कपालचयनंविद्याद्रथचक्रंतथाकृति। सुबोधिन्यांतु। जघनेनगार्ह

पत्यमित्यत्रगार्हपत्यस्यजघनभागइत्यर्थः। द्वितीयातुएतयायोगेभवत्युपपदविभक्तिः। एवंचगा
र्हपत्यायतनएवकपालोपधानंभवतीत्युक्तं। अथजघनेनगार्हपत्यमुपविश्यधृष्टिमादत्तेधृष्टिरसि।
उपवेषाभावेधृष्टिग्रहणंतत्सद्भावेतुतत्राप्ययंमंत्रः। धृष्टिर्वाउपवेषइतिदर्शनात्। गार्हपत्यमभिमंत्र
यतेअपाग्नइति। निष्कव्यादंसेधेतिदक्षिणांगारंनिरस्यति। अथान्यमावर्तयत्यादेवयजंवहेति। धृ
ष्ट्यागार्हपत्यादंगान्नादायदक्षिणस्यांनिरस्यति। अथान्यमंगारंगार्हपत्यादादायगार्हपत्यस्यपश्चाद्
क्षिणतआनीयस्थापयति। दक्षिणांगारनिरसनंगार्हपत्यस्यदक्षिणभागात्। अन्यावर्तनमुत्तरभागा
त्। इतिविधारः तंदक्षिणेषांकपालानांमध्येनाभ्युपदधाति। ध्रुवमसीति। अंगारमधिवर्तयति

निर्दग्धमिति। कपालस्योपर्यंगारंनिदधातीत्यर्थः। अथपूर्वार्ध्यमुपदधातिधर्त्रमसीति। अथापरा
र्ध्यमुपदधातिधर्त्रमसीति। अथापरार्ध्यमुपदधातिधरुणमिति। अथदक्षिणार्ध्यमुपदधातिधर्मा
सीति। अथपूर्वमुपधिमुपदधातिचितस्थेति। उपधिः कोणश्चेत्। अथापरमेवमेवेति। उपधिमित्यनु
वर्तते। द्वेउत्तरतः संसृष्टेउपदधातिचितस्थेति। एवमेवेत्यनुषज्यते। मध्यपूर्वार्ध्यंकमेणेत्यर्थः। चि
तस्थेत्यस्याधंतयोः पाठात्पथ्यांस्रुवकपालचतुष्टयातिरिक्तेषुकपालेषुघृतिकपालंसंभावयतिधोत
यति। उपहितानांषण्णामपिकपालानामुत्तरतोद्वेकपालेसंसृष्टेषड्भिरपिकपालैः संसृष्टेयथाभवत्
स्तथोपदधातीतिसंसर्गश्चमध्यमानांसाक्षाद्दक्षिणेषांपरंपरयाहतदपिलिंगंकपालानिपरस्परसं

स्पृष्टान्युपधेयानीत्यत्र। अंगारनिरसनाधिवर्तनादिकंदृष्ट्याकार्यं। दृष्टिग्रहणस्यादृष्टार्थत्वापनात्। ते
नप्रत्यंवाअंगारौनिवर्तयतीत्यादिसत्याषाढोक्तेश्च। कपालोपधानंतुहस्तेनैव। केचनदृष्ट्याकुर्वंतिन्न्
लंगविषणीयं। अथैतान्यंगारैरधिवासयतिभृगूणामिति। उपहितानिकपालानिअंगारैरधिवासयति।
अंगारैरिति बहुवचनात्त्र्यवरआवश्यकः। याज्ञिकास्तुएकमेवमहांगारंस्थापयंतितन्निर्मूलं। इद
मंगाराधिवासनंवेदेनकार्यं। आपस्तंबसत्याषाढादौतथोक्तेः। विद्यारण्येस्तुमुखादेयभस्मान्तरादयेदि
तिहैधस्यचस्यार्थानरंप्रकल्प्यदृष्ट्येवबर्हंगारासादनमितियथाकथंचित्साधितंहैदेनकपालेषंगारा
नध्यूहतीतिश्रुतिविहितस्यकल्पितसत्रार्थेनबाधस्यायुक्तत्वाद्दुरापेतं। अथैतानियोगेनयुनक्ति

यानिघर्मैकपात्कानीतिएतस्यमंत्रस्यजपएवकपात्रयोगः। याजमानसत्रेपिकालेकपालानियुनक्तियानिघर्मइतीत्युक्तं। एवंचाध्वर्युयजमानयोर्जपएवसिद्धः। विद्यारण्यप्रयोगक्रमेतूभौकपालानिस्थित्वाजपतइत्युक्तंतत्पूर्वापरविरुद्धतयाहेयं। उपांशुयाजस्यचरुपक्षेआदेवमित्यष्टकपालोत्तरतअंगारस्थापयित्वा। तत्रश्रुवासीत्रुचरुस्थालीमधिश्रित्यनिरंग्धरतिनामंगारैःपरिचिनुयादितिद्वैधार्थः। एवमेवोत्तराणिकपालान्युपदधाति। तत्रषट्सुउत्तरतस्त्रीणितदुत्तरतोद्वे। अन्यमावर्तयतीत्यारभ्यगोसवंत्रोक्तपात्रगणमावर्तने। वैरूपधार्थस्त्वेवमेकादश। शेषप्रयोगेतुअष्टौग्रहवत्नवमादित्रीणिवायज्यतआरभ्योत्तरतः पात्रस्थानीत्युक्तंतद्ब्राह्मणसुबोधिनीविरुद्धं। सर्वपुरोडाशकपालानित्यग्भूतान्येवभवंतित्रैधातवीयेष्वंडुत्तानेषुकपालेष्वधिश्रयतीतिविशेषविधानात्। अभीधनेकपालान्युपधत्तइतस्थालीमध्यस्थांतिभ्रपणानिनयंतिविष्टंसंयवनीयाआपद्यंति। ब्रह्मत्वनेनकर्त्रनियमद्योतयति। काष्ठाग्निअग्नौप्रक्षिपंति। नैःकपालानिउपरिष्टाद्धापयंति। चरुस्थालीत्वतप्तांकुर्युः। आधुनिकास्तुकपालोद्धापनंनैवकुर्वंतितत्प्रमादकृतकर्मभ्रंशएव। लौकिकीरापःपवनेनपिष्टसंयवनार्हाःकुर्युः। अत्रकेचनऋणीताभ्यःकिंचिदुदकमानीयतन्मिश्रितलौकिकोदकंमदंत्यांतापयंतितद्ब्राह्मणसुबोधिनीविरुद्धं। मदंत्यांतिरःपवित्रमपामानयनस्यविकल्पोद्वैधे। अथोत्तरेणगार्हपत्यमुपविश्यदक्षंयमःतिरःपवित्रंपार्श्वयोरुष्णाजिनास्तिष्टानिसंवपतिदेवस्यत्वाग्नये

DR BHAU DAJI MEMORIAL

बो०द० २२

जुषुरं संवपामीति अग्नीषोमाभ्या मशुक्राँइति यथादैवतं। अंतर्वेदि पात्रीं निधायतस्यामुदगग्रं पवित्रं संस्थाप्य कृष्णाजिनादिवष्ठानि संहरति। अंतर्वेदि पात्रीं निधा नेप्रमाणमाह कात्यायनः। अंतर्वेद्यपरेणवागार्हपत्यमवस्थिनायामिति। हरंकात्यायनोक्तमपिबोधायनैर्व्याख्यं। आकांसा करणा र्थंसत्रांतरस्य हरणस्यन्यायसिध्यत्वात्। रोषादमन्त्रगार्हपत्येपात्रीमधिश्रित्यतत्रासांसक्तेननिरूपवित्रं धारयन्दक्षिणेनकृष्णाजिनासंवपतीत्याहुः। तत्रयद्यपिघृतालिनायांपात्र्यांनिष्टप्तोपवानायांपवित्रवत्यांपवित्राणिसंवपतीत्यापस्तंबवत्रमाकांक्षाभावादयाह्यमेव। परंतुस्वाविरुध्धसत्रांतरोपसंहारन्यायेन माह्यमितिचेदाग्रहस्तथापिनिष्टप्तेनस्रुक्पात्रीमंतर्वेदिनिधायसंवपेत्तूनत्वग्निस्थितपात्र्यांसंवा २२

पः प्रमाणाभावात्। ततआचाराद्द्राव्यलेखाभ्यपात्रेमग्नावधिश्रित्यस्रुवेणापात्रीमुत्तरतउत्तार्यां तर्वेदिनिदध्यात्। अथपारकर्मणमाहाहरापआनयेति। आहरणंविप्रकृष्टस्यसमीपेप्रापणंआनयंतु पिष्टेषुसेचने। पारकर्म आग्नीध्रादन्यस्तदभावेसएववा। आहरतिप्रेषकारः प्रणीताभ्यः स्रुवेणोपहृत्य वेदेनोपयम्यपाणिंवांतर्धायैवंमदंतीभ्यस्ताउभयागनीयमानाः प्रतिमंत्रयतेसमाप आद्भरति। प्रणीना भ्यः स्रुवेणापोवदायनोदेनोपसंगृह्यसव्येपाणोवास्रुवमंतर्धायाध्वर्युसमीपमेत्यकस्मिंश्चित्पात्रेता आपोनिषिच्यएवंमदंतीभ्यः स्रुवेणादायवेदंपाणिंवांतर्धायाध्वर्युसमीपमेयपूर्वानानिदंनोदकं एकदेवष्ट यकुधारयादक्षिणहस्तेनैवप्राङ्मुखोपविष्टः पिष्टेषुसेचयेत्॥ भाष्यप्रयोगेतुउदकद्वयमेकीकृत्यसे

चयेदित्युक्तंतत्रआपःप्रणीताःअद्भिःमदंतीभिःसमग्मतसंगछंतांसंयुक्ताभवंतितिमंत्रलिंगेनाप्
ष्टेषासेचनानंतरमेवायामेकीभावावगमादुपेक्ष्यं। एवंसत्यध्वर्वास्तिष्ठन्सेचयेदित्यप्युक्तंतत्रैवतद्
पिमूलानुपलंभात्प्रतिभाषाविरोधाच्चचिंत्यं। अग्निष्ठपात्रासेवोक्तजलसेचनंकलापात्रीस्थानारयेदि
तिशेषादयंआहुस्तुरोडाशस्यांतःपाकानुपपत्याकुराकाशावलंबनेनापिष्टभर्जनस्वीकारेपिप्रणी
तादत्युदकसेचनस्योपरिकर्तव्यत्वेमानाभावाच्चनादेयं। अध्वर्युःपिष्टेषुनिषिच्यमानाअपःप्रतिमं
त्रयतेसमापदति। प्रतिमंत्रणंअभिमंत्रणमितिसुबोधिन्यभिप्रायः। नचपरिभाषयाप्राप्तस्यउपदिश्ये
वकुर्यात्। विद्यारण्यास्तुप्रत्यध्वर्युःस्थित्वामंत्रणंप्रतिमंत्रणेमिति। अथानुपरिक्रामयत्यध्व

अमुष्मा

इति। प्रदंतीतिशेषः। इदंचप्रदक्षिणंकुर्यात्प्रदक्षिणमनुपरिक्रामयतीतिसत्याषाढात्। संयो
तिजनयत्याहुति। संयमनंहस्तंमर्दनेनसम्यक्मिश्रीकृत्यसंपाडनमितिविद्यारण्याः। वस्तुतस्तुमेष
णेनैवालोडयति। मेषणासादनस्याहुष्टार्थत्वापातात्। तथैवशिष्टसमाचाराच्च। संयुत्यव्यूह्याभिमृश
ति। अग्नयेत्वाअग्निषोमाभ्यामुष्मैतंनियथादेवतं। संयुत्यसंपाड्य। व्यूह्यपिष्टानिविभज्याभिमृश
ति। पिंडंकरोतिमरुत्स्यातिअत्रैकत्वमविवक्षितं। प्रतिपिंडंमंत्रावृत्तिः। तंदक्षिणेपांकपात्रान्वांप्रत्यूह्यांगा
रांस्तेष्वधिषृणाक्रियमोमीति। तमाग्नेयंपुरोडाशंनिरस्तांगारेषुकपालेषुस्थापयति। अंगारानिरसनं
गार्हपत्येकार्यमितिविद्यारण्याः वस्तुतस्तुबहिःश्रपणपक्षेबाहिर्निष्काशितस्याग्नेर्विनावचनंआयन

नेप्रक्षेपोनुचितइतिभाति। एवंवक्ष्यमाणपुरोडाशास्यांगारानपोहनीत्यत्रापिद्रष्टव्यं। कपालं
गारापोहनंचवेदेनकार्यं। सत्याषाढसूत्रेतथोक्त्वा आकांक्षापूरणार्थंसूत्रांतरंग्रहणस्योचितत्वादिति।
ग्रथयत्युरुग्रथस्वेति। ग्रथयतिविस्तारयति। तत्कथमित्यत आह। तन्वंतंकुर्मंपकारंकरोति। तन्वं
तंततुरंतोयस्यतंतन्वंतंकुर्मंस्येवंपकारः आकृतिविशेषोयस्यतंकुर्मंपकारमिति। अत्रविशेषः सत्या
षाढआह। अन्तुगमनपूर्वाकृतिमभ्यवाकसात्रंकुर्मस्येवंप्रतिकृतिंकरोतीति। कमठस्येवेषत्प्रतिकृतिं
प्रतिमांकरोतित्यादिकश्चित्कूर्मस्तुगः कश्चिदपूर्वाकृतिरपूर्ववन्निर्मस्तदुभयविलक्षणोनात्युन्नो
तिनीचइत्यर्थः। अभ्यवाकसात्रमितितुपारिशेष्यात्। अथनिरःपवित्रमास्यस्यात्यासाज्यंनिर्वप
निमहीनामिति। सर्वाण्येवहवींषिपरिनिष्टप्याज्यंनिर्वपेदितिहैधे। तत्रोपांशुयाजस्याज्यद्रव्यक
त्वपक्षेत्वाग्नेयपुरोडाशाग्निप्रथनानंतरंआज्यनिर्वापः। चरुद्रव्यकत्वेविरूपेषुचसर्वहविरधिश्र
यणानइतिव्यवस्थांभाष्यकारादयआहुः। वस्तुतस्तुव्यवस्थाकरणेमानाभावात्तुल्यविकल्पइतिभा
ति। आज्यस्थाल्यामुद्गंप्रपवित्रंनिधायदक्षिणेनाज्यंनिर्वपेत्। विलीनमाज्यंगार्हपत्येऽधरार्ध
मधिश्रित्यानिर्वपोदितिविधारण्यप्रयोगक्रमे। सव्यहस्तेनपवित्रधारणमनाचारः। तामेनस्थाल्यो
त्तानिर्वपेदित्युक्तंविधारण्येस्तालिंमूलकमितिनविधः। उपांशुयाजस्यचरुपक्षेतूदानीतिरः पवि
त्रंचरव्यंस्थाल्यांनूष्णीनिर्वपेत्। अथोत्तरतोभस्मामिश्रानंगारान्निरूह्यतेषधिश्रयतिगार्हप

त्यस्योत्तरतः। आज्यमित्यनुवर्तते। श्रुतिसुबोधिनी। एतेनायतनाद्बहिर्भावोऽग्नेरिति भाति। विधा
रणेयमनुभायतनाङ्गाराणामबहिर्भावइत्युक्तं। पवित्रमोक्ष्यामेवनिदधातीतिविधारण्यनुयोगो।
एवमेवोत्तरपुरोडाशमधिषवणफलके। स्पष्टं। अथश्रुतमथदधाति। इदंसन्नयनः। अथयाज्यमनूयाज
दक्षिणस्यत्वंग्राहयतित्वंगृह्णातिगृह्णातीतित्रिरथोत्तरस्येति। अथपर्यग्निकरोत्यंतरितं
र० नयद्वतित्रिः। पर्यग्निकरणंनामस्रुक्तोल्मुकेनपरितः प्रदक्षिणमावर्तनं। तथाचमत्याषाढः। अं
तरितंरक्षद्बहुल्मुल्मुकेनत्रिःपर्यग्निकरोतीति। स्रुक्लिङ्गदर्शनैः पर्यग्निकरणंतुस्मार्तविषयमेव। उल्मुकनि
रसनेमाहसत्याषाढोगृह्ये। उल्मुकेनत्रिःपर्यग्निकरोत्तरतस्मादुह्यास्येति। सर्वहविषांतंत्रेणपर्यग्निक

रणं। पर्यग्निकरणकालेआज्यमग्न्यधिश्रितमेवगृह्यवादितिभाति। अथदक्षिणंपुरोडाशंश्रपयतिदे
वस्त्वेति। श्रपयतिदर्भैराभिज्वलयतिननुपचति। अविदहंतः श्रपयतेत्युत्तरत्रश्रपणवचनात्। गार्ह
पत्यमभिमंत्रयतअग्नेहव्यमिति। एवमेवोत्तरंपुरोडाशंश्रपयति। अग्नेहव्यंरक्षस्वेत्येनंकुर्यात्। अ
थदक्षिणंपुरोडाशंभस्मनाभिवास्यतेदेनाभिवासयतिसंब्रह्मणाद्रव्यस्वसंब्रह्मणाद्रव्यस्वेतित्रिः।
केवलभस्माभिवासनंतूक्ष्णीनत्रक्षस्याकार्यमितिविधारण्याः। वेदेनतुसांगारंभस्माभिवासनं
समंत्रकंवेदेनसांगारंभस्माभ्यूहतीतिसत्याषाढात्। अथोत्तरं। पुरोडाशमितिशेषः। भस्मना
भिवास्येत्यादिप्रागुक्तएवक्रमः। अविदहंतः श्रपयतेतिवाचंविसृजते। संवापकालेवाचंय

मद्दतैङ्ग्रियमिनौवाचंदद्दानीमविदहंतद्दतिमंत्रमुच्चार्यविस्रजेत्।वाङ्नियमोवदनाभावप
रिपालनं।विसर्गस्तुपात्रनयनत्यागः।ततःपरंनियमोनास्तीत्यर्थः।नतुकिंचिद्रक्तव्यमेवे
तिश्रुत्यंतरपरिकर्मिणः।आपस्तंबस्तु।आग्नीध्रोहवींषिसुश्रुतानिकरोतीति।अत्रैतत्पात्री
संपादनंगार्हपत्याद्गारेणाभितप्यहस्तांतवेदिप्रतीचीनंतिस्रउल्लेखासुनिनयत्येकनायो
गार्हपत्याद्गारमाहृत्यतेनांगारेणाभितप्योतिसुबोधिनी।एतेनोदकनापार्थनाहनांगारंपर्यग्नि
करणोल्मुकवद्बहिरित्यजोदितिभाति।विधारण्येनस्रुपात्रीगार्हपत्यसमीपेधारयन्नुल्मुकेनना
पयित्वानदुल्मुकमग्नोप्रक्षिपेदित्युक्तंतत्किंमूलकमितिचारुणीयं।अत्रबौधायनेनांगा

माहृत्येतिसामान्येनोक्तावपिउल्मुकेनाभितप्योतिसूत्रांतरादेकतःप्रदीप्तकाष्ठेनैवनापोविधे
यः।केचनप्रदीपितदर्भेणाभितपंतितदुक्तसूत्रविरोधान्नेत्यं।निरवशेषंहरणमितिविधा
यैःसाधितं।अंतर्वेदिप्रागायताःप्रागपवर्गास्तिस्रोरेखाःकृत्वापात्रीस्थमुदकंसर्वप्रागा
त्यगपवर्गमंत्रत्रयेणरेखासुनिनयति।रेखाकरणंस्फ्येन।स्फ्येनोदीचीस्तिस्रोरेखाःकृत्वेतिसत्या
षाढोक्तेः।अथवेदमादत्तेअयंवेदइति।वेदेनवेदंत्रः-समार्ष्टिवेदेनवेदमिति।प्रागपवर्गसंमार्गः।
उदगपवर्गस्तेलाचारप्राप्तंस्वपरिभाषाविरोधादाश्वलायनैर्नादर्त्तव्यं।अथजघनेननेद्धेतिष्ठन्स्फ्य
मादत्तेदेवत्येति॥वेद्याजघनंविज्ञायः।तदभावेगार्हपत्यव्यवधानेनवातत्पश्चिमोदेशः।तदव्यवधा

DR BHAU DAJI LAD ORIENTAL

नेनुवाश्रोणिपरस्रुत्रोरोदेशइति। तिष्ठन्निति महावेद्यर्थे तेनप्राकृतावासी नैनैवस्फ्यादानादि
सर्वकार्यं। अथवास्फ्यादानमात्रंतिष्ठताकर्त्तव्यंतदभिमंत्रणादिकंतुसर्वमासीनेनैवेतिविधारण्यामि
प्रायः। सुबोधिन्यांतुतिष्ठन्नित्यधिकारात्स्फ्यादानमारभ्यसर्वंस्रुवयज्ञुहरणंतिष्ठतैवकर्त्तव्यमि
त्युक्तं। ममतुविधारण्योक्तोद्वितीयपक्षएवप्रकृतौसमीचीनोभाति। दर्भाभ्यां सहस्फ्यमादत्तेइतिकौ
त्सव्याख्यानंतन्मूलंनदृश्यते। आदायाभिमंत्रयतेवृद्धस्योति। आदायेतिपुनर्वचनस्यार्थंनानाविधंवक्त
व्यंति। वस्तुतस्तुकंडनेकृष्णाजिनावधूननादिमंत्रानुवत्वापुनराधिवापेनथैवकृष्णाजिनमवधूनोत
त्यादिनापुनःस्रुक्संस्कारेथैवात्रपुनःपठितमितिभाति। अथैनंबर्हिषांस्तृणतिवापुरसीतिद्विरुण

भुग्नेनदर्भेणमूलादारभ्याग्रात्स्फ्यमुन्मार्ष्टि। अथांतर्वेदिउदीनाग्रंबर्हिर्निदधातिपृथिव्याइति। वे
दिस्त्रेधाविभज्यतत्। पश्चिमभागेनिदधातिसोमेनथादर्शनात्। तस्मिन्स्फ्येनप्रहरतिपृथिवीति। त
स्मिन्नितिमूलप्रदेशाइतिगम्यते। उदग्गपवर्गत्वाय। प्रहरतिप्रहरणेनद्विधाकरोति। भूमेरपिकंचित्
खननं। स्फ्येनसस्तृणान्पांसूनपादायेत्यापस्तंबोक्तेः। अपहतइत्यादत्ते। स्फ्येनेत्यनुवर्त्तते। प्रहरणविधि
स्तृणस्यतदनुनिष्पन्नपांसूनांचादानं। स्फ्येनैवहस्तेनसाहाय्यमात्रंकार्यमत्राक्येर्थे। हरणादिकंतु
केवलेनस्फ्येनेतिवैजयंती। व्रजंगच्छगोस्थानमितिहरदत्तः। उत्करदेशपर्यंतमित्यर्थः। वेदिंप्रत्यवे
क्षतेवर्षास्विति। प्रत्यवेक्षणंपराङ्मुखत्वावलोकनं। हृत्वोत्करेनिवपतिनिदधातेति। निवपनानंतरमाग्नी

ध्रोंजलिनाच्छादयति।न्युप्तमाग्नीध्रोंजलिनाभिरुपहानीतिकल्पान्तरम्।स्वसूत्रेऽनुक्तत्वादिदंकर्तव्यं।केचनाग्नीध्रस्यांजलावनिवपंतिनत्वसूत्रांतरीयंनास्मत्सूत्रानुगुण्यादुत्करेनिवपनीतिसूत्रविरोधात्।द्वितीयंप्रहरति।तत्रअपहतोरक्षःपृथिव्यैदेवयजन्यैइत्यादानमंत्रः।तृतीयंप्रहरति।तत्रपृथिव्याअदेवयजनइत्यंतंआदानमंत्रः।मामौगरलन्मोदिवमाक्रमीदित्यंतोनिवपनमंत्रः।तत्रांगुष्ठचतुर्थेहरतिसहबार्हिषा।हरणंप्रहरणादिनिवपनांतस्योपलक्षणं।छिन्नावशिष्टदर्भाभ्यांसहपांसूनादायेतिशेषः।अथपर्वपरियाहंपरिग्रहानिवसवइत्यादिअवद्यंधपरियहविषयेमंत्रयमुक्तंतत्रदक्षिणतःप्रागपवर्गंपश्चात्तुदग्गपवर्गंउत्तरतःप्रागपवर्गमितिशालीकिमतनेवाभ्यलायनेर्थाद्यं

देशस्यावधि

स्वसूत्रपरिभाषानुगुण्यात्। एवंवक्ष्यमाणोत्तरपरिग्रहोपिप्राग्वर्गंकुर्यात्। परिग्रहोनामाच्छिकीर्षितवेदिसंबंधिपरिस्तरणायरेखाकरणंतत्रास्मेयेन। तथाचसत्याषाढःस्मेयनवेदिंपरिगृह्णातिदक्षिणतःप्राचीरेखांलिखतीत्यादि।अथकरणंजपतीमामिति।क्रियतेअरक्षोद्वारावदनेनेतिकरणोमंत्रस्तंजपति। वेधांस्मेयेनलब्धाजपंतिकेचित्। अथप्राचीस्मेयेनवेदिमुखंनिदेवस्येति।प्राचीप्राक्प्रवणामित्यर्थः। प्रागपवर्गस्यौत्सर्गिकत्वात्। उधनेनवेदिंकरोति।खननेमानमुक्तंकर्मांते।द्व्यंगुलांखनयेदित्येकेषांत्र्यंगुलंखनयेत्येकेषांचतुरंगुलंखनयेत्येकेषामित्यादि। अखातवेदिकरणावारोनिर्मूलइतिभाति।अथाग्नीध्रमाहाग्नीदलास्त्रिर्हरति। ततास्त्रिराग्नीध्रोहरति।ततःखातत्र

देशादाग्नीध्रोदक्षिणपाणिनात्रिवारंस्रुक्समर्पणीयोत्करेक्षिपतीति। समुधतस्याग्नीध्रउत्करेत्रिर्
वपतीतिसूत्रांतरात्। अंजलिनाग्रधरणमनाचारः। त्रिवारग्रधरणंदक्षिणहस्तेनादृष्टार्थं। दृष्टा
र्थंतुग्रधरणंकेनचित्तात्रेणकर्तव्यमेव। अन्यथाह्यंगुल्यादिखनितसर्वग्रहणासंभवात्। एवंकेन
लक्ष्येनैषह्यंगुल्यादिखननासंभवात्स्रुवादिनिर्मितखनित्रेणापिखननंकार्यं। यदाग्नीध्रस्त्रिर्ह
रतीत्यथसंप्रेषमाह। ब्रह्मन्नुत्तरमिति। गृह्यतउत्तरंपात्रंहविरुपहानि। प्रस्तरअनुज्ञातः।
करुतमसीत्यादि। अथप्रतीचीस्थ्येनकेदिमोयुव्यतेधाअसीतिप्रतीचींप्रत्यगपवर्गां। योयुव्य
तेस्थ्येनसमीकरोति। अन्यत्रभानीतयामदासमीकरोतीतिनकुरुत्। तत्रमूलंविमृश्यं। अथा

तर्वादतिर्यंचंस्थ्यंस्रुग्ध्यासंप्रेषमाहप्रोक्षणीरासादयेध्मबर्हिरुपसादयस्रुवंचस्रुचंश्चसंमृ
ष्टिपत्नीरंसन्नाज्येनोदेहीति। वेदंत्रेधाविभज्यपाश्चात्यंवेदतृतीयभागंविहायतत्संनिहितएव
मध्यभागव्यापरार्थंस्थ्येनोदीचीरेखामालिख्यतन्मध्येतिर्यग्भूतंस्थ्यंस्थापयित्वासंप्रेषमाह। त
थाचसत्याषाढः। पश्चार्धवेदेवितृतीयदेशइति। स्थ्यस्यवर्मन्त्सादयतीतिवक्ष्यमाणानंतरसूत्रो
क्तकरणंसूचितं। प्रेषवचनस्याग्नीध्रकर्तृकत्वमध्वर्युकर्तृकत्वंचेतिसाधितंभाष्यकारैः। स्थ्यस्यवर्म
न्नितिस्थ्यस्यस्थानइत्युच्यतेनरेखेतिसुबोधिनी। इदमेवयुक्तंभाति। स्थ्यधारणंदक्षिणाग्रमितिश्रु
त्यर्थोवर्णितःसुबोधिन्यां। स्थ्यंधारयन्त्संप्रेषइतिप्रयोगकाराः। आहरंत्येनाःप्रोक्षणीरभिपूर्वद

स्त्रिणेनाध्वर्युनास्फ्येउपनिनीयस्फ्यस्यवर्त्मन्त्सादयति। आहरंतीतिबहुवचनादमंत्रकाणिकर्मा
ण्यन्यकर्तृकाणिभवंतीतिमत्वयति। दक्षिणेनाध्वर्युमित्यनेनाग्नीध्रकर्तृकंशाःस्फ्यइत्यादिक
मध्वर्युकर्तृकमितिकेचित्। अध्वर्युःवामेनस्फ्यंधृत्वादक्षिणेनघोरुणानिनयनमितिभाष्यकारेण
कंतार्किंमूलकमितिविचार्यं। अथोकरेस्फ्यंनिहंतियोमाहदेति। निहंतिउदस्यति। अत्राहापस्त
बः। पुरस्तात्स्वंचमुत्करेस्फ्यमुदस्यति। यत्यंचप्रत्यगग्रं। हन्तीघशाल्यस्फ्यंचघशालयति। अग्र
मग्रनिरूपणान्नित्यापत्तंबः। उपसादयंत्यनद्धिधाबार्हिर्दक्षिणमिधमुत्तरंबार्हिः। द्वधाबार्हिरितिम
न्त्रग्रहणंसहोभेआनीयदक्षिणोत्तरभावेनहन्तद्वयेनासादयतिसहेवेतिगम्यतइतिवेजयंती

आसादनदेशःकर्मांते। समान्येतानिकुर्यात्प्रणीताआहवनीयंब्रह्माणमिध्माबर्हिरितियज्ञशिर
इत्येतदाचक्षते। प्रणीनाभ्यउत्तरतइध्मात्तदुत्तरंबर्हिरितिसाधितंसुबोधिन्यां। बर्हिषउत्तरमिध्म
मितिश्राद्धीकिः। अथैनाःस्रुचःसमादनेदक्षिणेनस्रुवंजुहूपभृतोमध्येनध्रुवांप्राशित्रहरणंवेदप
रिवासनानीति। गार्हपत्येप्रतिनयतिप्रत्युष्टमिति। जघनेनगार्हपत्यंप्राञ्चुरवउपविश्यप्रतिनयनमि
तिविद्यारण्याः। ममतूत्तरतउपचारोविहारइतिसूत्राद्गार्हपत्योत्तरतःप्राञ्चुरवउपविश्येवप्रतिनय
नंसंगार्गोविनिभातिअथस्रुवंसंमार्ष्टिगोष्ठमिति। वेदपरिवासनेरितिशेषः। त्रिरंतनास्मिन्बाह्यतास्त्रिरे
वंमूलैर्दक्षंसंमृज्याद्भिःसंस्तृत्यप्रतितप्योत्सृजतीति। अग्नेर्बिलभागेत्रिवारंभागपवर्गःसंमार्गः

विलाहहिर्भागेपिप्रत्यगपवर्गे। दंडमूलैरधःप्रागारभ्योपरिभागपवर्गइतिसुबोधिन्यां। संमार्ग
नंतरंस्रुवमद्भिःस्पर्शयित्वागार्हपत्येप्रतिनप्यान्यहस्तेनचैवदद्यात्। अथनुहंसंमार्ष्टिवाचमित्या
दि। अथैतानिस्रुक्संमार्जनान्यद्भिःसंस्पृश्यगार्हपत्येनुप्रहरतिदिवःशिल्पमिति। स्वाहांतोयंमंत्रः।
उत्करेवानिरसनमितिद्वधे। उत्करेवानिरसनंविक्षुकाणामितिविषयमितिदामोदरः। एतन्निर्मूलमितिविद्या
रण्याः। अथायेणोत्करंतृणानिसंस्तीर्यतेषुस्रुचःसादयति। कल्पेअथशब्दआनंतर्यार्थः सर्वत्रेति
सुबोधिन्युक्तेः संमार्गग्रहरणानंतरंआग्नीध्रःपरिकर्मिहस्तात्स्रुवादीन्यादायासादयति। शेषप्रयोगे
व्येवं। केचनपरिकर्मग्रहीतंग्रहीतमासादयतीत्याहुः तन्नाघ्यसुबोधिनीविरोधाद्विचारणीयं। अ

थैनांपत्नीमंतरेणवेद्युत्करोत्प्रपाद्यजघनेनदक्षिणेनगार्हपत्यमुदीचीमुपवेश्ययोक्त्रेणसंनह्य
तिआशासानामिति। एतामितिसर्वनाम्नाइतःपूर्वमेवपत्न्याःप्रयोगदेशोअवस्थानंगम्यते। इदा
नीतुपत्नीतीर्थेनप्रपद्यस्वपत्निवेद्युत्करावंतरेणप्रविशास्वेतिवाग्नीध्रसंप्रेषंश्रुत्वातीर्थेनबहिर्निर्ग
त्यपुनस्तीर्थेनैवप्रविशेत्। यदिचाद्धाराद्बहिरवस्थितानदासंप्रेषश्रवणानंतरमेवप्रवेशः।
नचास्यप्रेषस्यकल्पेनुक्तत्वात्कथंप्राप्तिरितिवाच्यं। सर्वत्रणिच्प्रत्ययप्रयोगेएवंसप्रेषंकुर्या
दितिहानिकारोक्तेः। प्रपाद्येत्यनेनाग्नीध्रप्रेरितयाप्रपदंगम्यतइतिविचारण्योक्त्रेश्च। कल्पे
नुक्तिस्तुनात्रवैधैकशब्दनियमइत्येवंपरा। एवंप्रणीताप्रणयनंयाज्ञनीत्यादावपिप्रैषानुक्तिदोषपरि

हारोवगंतव्यः। जघनेनदक्षिणेनेतिशाद्वूयेननिर्ऋतिर्दिशमुपलक्ष्यते। उदीचीमुदञ्चुरवी। कल्पांत
रविशेषः। ऊर्ध्वर्तुमासीनांपत्नीसन्नह्यनीतिसन्नह्यतिसन्नाहयतीत्यर्थः। सुबोधिन्यांतुसुक्कमितिऊ
नेतिरितिनमंत्रौ। मंत्रसमाम्नाये अभावात्। ब्राह्मणेसूत्रेचविनियोगाभावाच्चेत्युक्तं। अस्मिन्नुपवेषा
नेषाञ्चुरमेव। वेदकर्माणिप्रयोजयेत्प्राञ्चुखइतिपरिभाषणात्। उपस्थासनंत्वविधेयं। अविरोधात्
अनेकपत्नीविषयेहैधंसुबोधिन्यांद्रष्टव्यं। अथैनांतिरःसविन्नमपआचामयतिपरिषिंचति। यज
मानाचमनोक्तन्यायोवाप्यनुसंधेयः। अथैनांगार्हपत्येसमिधमाधापयति अग्नेव्रतपते० राध्यता
स्वाहेति। स्वाहांतानएवचत्वारोमंत्राःकल्पेपठिताः। अतःस्वाहाकारंकुर्यान्नवेतिभाष्येकोविचारःकि

मर्थइतिनविद्मः। अथजघनेनगार्हपत्यमुपवीदतिसुब्रह्मजसइत्यादिउत्तमइत्यंतं। अयमुपवेशा
नमंत्रः। अथैनांवाचयत्यूनेतिरिक्तेधीयानाइतिभाष्येतुइदंसूत्रमदृष्ट्वाब्राह्मणप्रामाण्यादस्यज
पःसाधितइति। शेषप्रयोगेचोपवेशनोत्तरंसुब्रह्मजसइत्यादिधीयानाइत्यंतंजपतीत्युक्तं। तदसंगत
मितिभाति। अथैनांगार्हपत्यमीक्षयति। अग्नेव्रतपतइति। अत्रापिगार्हपत्यमीक्षस्वेतिप्रेषआ
ग्नीध्रकर्तृकः। अथैनामाज्यमवेक्षयतिमहीनामिति। अत्राप्याज्यमीक्षस्वेतिप्रेषःपत्न्यनेकत्वेनि
र्णयोभाष्यसुबोधिन्योर्द्रष्टव्यः। आज्यस्थालीमुद्धृत्याज्यमवेक्षतयतीतिभाष्यप्रयोगेतत्किंमू
लमितिविचार्यं। अथैनद्गार्हपत्येधिश्रयतितेजोसीति। समिधमुपयत्यग्नाइंहरातितेजोनुप्रेहाति।

उपयत्सअधस्तात्संयोज्य। वामहस्तेनाधस्तात्समिधंसंयोज्यस्थालीनयंतिकेचित्तद्दक्षिणांगप
रिभाविरुद्धत्वाद्धेयं। अथैतदाहवनीयेधिश्रयतिअग्निमुद्वहति। अत्रैतांसमिधंमध्यतआहवनीय
स्याभ्यादधाति। यत्राज्यमधिश्रितंतत्राभ्याधानं। समिदाधानेसमिदाधानंतूष्णीं। कुल्मासेनुस्वाहे
तिमंत्रउक्तः। अथैनद्येणवोक्षणीःपर्याहृत्यदक्षिणार्धेवेद्यैनिधायाध्वर्युर्यजमानमाज्यमवेक्षयतिनिमी
ल्यावेक्षनेनेतिब्राह्मणं। वेददक्षिणार्धेस्रुग्वर्त्मनिसादयेत्। एतदंतमाग्नीध्रकर्तृकं। आज्यमवेक्षय
तीत्यत्रनिमित्तकर्ताध्वर्युःसाक्षात्कर्तातुयजमानः। अतउभयोरपिनिमील्यावेक्षणमध्वर्योराज्य
मसीतिवाचनमितिविचारण्याः। सुबोधिन्यांतुआज्यमवेक्षयत्याग्नीध्रः। उत्तरसत्रेध्वर्युग्रहणा

DR. BHAU DAJI MEMORIAL

दिति। अथैनद्यथाहृतंपर्याहृत्योत्तरार्धेवेद्यैनिधायाध्वर्युरवस्यते। अग्नेरिति। अत्रापिस्रुग्वर्त्मनि
आसादनं। अथैनदुदानीनाग्राभ्यांपवित्राभ्यांपुनराहारंत्रिरसुनातिशुक्रमसीत्यादि। आत्मनः
सकाशात्सुरत्नान्नीत्वाअनुच्छसनेनप्रत्याकर्षादितिपुनराहारत्वाद्दार्थइतिसुबोधिनी। वैजयंत्यां
तुआज्यस्थाल्यांपवित्रेपश्चाद्भागमारभ्यप्राग्भागंनीत्वापुनःपश्चाद्भागमानीयोत्सुनातिपुनराहारो
गमुत्सवनस्थेतिपुनराहारंतूष्णीं। कृत्वामंत्रेणोत्सवनमित्युक्तं। अनुच्छसनातुनोक्ता। अत्रांगुष्ठोप
कनिष्ठाभ्यासुनाभ्यांपाणिभ्यामित्याद्यश्वायनोक्तोविशेषोग्राह्यः। अत्रयद्यपिमंत्रभेदोनघृतीय
तेतथापिकल्पांतरमनुसृत्यमंत्रभेदोंगीकृतइतिसुबोधिनी। अथप्रोक्षणीरुसुनातिदेवोवःस॰

शिभिरितिपक्षः। स्पष्टं। चोक्षणीषुपवित्रेवधायादत्तेदक्षिणेनस्रुवंसव्येनजुहूंवेदमतिष्ठाप्य
तस्यांगृह्णन्नेतेभ्यःकंत्वा० गृह्णामीति। एतेनयजुषाचतुर्गृहीतंगृहीत्वासंमृश्योत्सृजति। अंतर्वे
द्याज्यानिगृह्णातीतिसत्याषाढोक्तेरंतर्वेदेजुहूप्रतिष्ठापनं। सचवेदउदगग्रइतिभवःआश्वला
यनेत्वुत्सृष्टभिषायाग्रगएववेदोयाह्यः। अत्रउपभृत्कंस्थाल्याजहूंधारयमाणोमध्यदेशउपभृ
तिभ्रुवौघृतेचिनायांध्रुवायामितिसत्याषाढोक्तोविशेषोविरोधाद्ग्राह्यः। प्रत्यगग्रंस्रुवोदसनवत्।
संमर्शनंदक्षिणहस्तेनादायार्धंउद्धृत्यघृतयजति। अन्यस्यहस्तेदद्यात्प्रदानमासादनपर्यंतमुपा
धारणार्थमितिगम्यतइतिसुबोधिनी। अथोपभृतिगृह्णातीत्योनिस्ला० गृह्णामीति। एतेनयजु

षाष्टगृहीतंगृह्णातिस्रुग्यसोग्रहान्गृह्णानःकनीयआज्यंगृह्णातीतथैवसंमृश्योत्सृजति।
जौहवाच्चतुर्गृहीतादूनमष्टगृहीतंभवतितथागृहीतव्यं। अथध्रुवायांगृह्णातेअर्चि० एतेन
यजुषाचतुर्गृहीतंगृहीत्वाभिघार्यसंमृश्योत्सृजति। अभिघार्यचतुर्गृहीतगृह्णातेतरस्या
ज्याज्येनध्रुवामभिघारयति। पंचावत्तिनामपिचतुर्गृहएव। घृतगृहैकत्वोक्तेःपंचावदान
विधिर्हैधिरुधस्तान्निर्मूलरूतिविधारण्याः। यजमानःपंचानांस्रुत्यादिभिरनुमंत्रयेत्। न
त्रयाजमानेगृहीतंगृहीतमनुमंत्रयतइतिवचनात्स्रुचिस्रुवनिषेचनानंतरमस्रुमंत्रणमिति। तत्र
तूष्णीं ध्रुवापूरणेअभिघार्यमाणमनुमंत्रयतइत्युक्तेःसमकालमनुमंत्रणं। मंत्रमुच्चारयन्नेवमंत्रार्थ

स्तेन संस्मरन्। शोषिणंतन्मनाभूत्वास्यादेतदनुमंत्रणमिति अथैतामाज्यस्थाली सस्रुवांजघने
नवेद्यैनिधायप्रोक्षणीरुन्महन्नुपोत्तिष्ठति आपोदेवीरिति। वेदिजघनवाद्धार्थः प्रोक्षणीसंस्कार
श्चमायुष्कोनुसंधेयः। अथैधंविस्रस्यप्रोक्षतिरुक्ष्याइति। वेदिप्रोक्षानिवेदिरसीति। बर्हिः प्रोक्षतिर्व
र्हिरसीति। सरुभिर्वाप्रोक्षणमितिद्वैधे। आहरत्येतद्बर्हिरंतरेणप्रणीताश्चाहवनीयंचेति। बहुवचने
नाहरणमन्यकर्तृकं। अथेणेधंनीलाघणीनाहवनीययोर्मध्येनाहरंति। इध्मघणीतयोर्मध्येनप्रा
नीलाघणीनाहवनीययोर्मध्येनघनराहृत्येतिकेचित्तन्मूलविमृश्यं। वेषांतदंतर्वेदिघुरोपध्यासा
द्यप्रोक्षतिवेदेत्यादि। तिष्ठन्नरुआसीनःकमादयमध्यमूलानिप्रोक्षेदितिपक्षांतरंद्वैधे। अथतत्

सहस्रुचापुरस्तात्प्रत्यंचंग्रंथिंप्रत्युक्षति। पुरस्तात्पूर्वभागगतंस्रुकपाणिभ्यांप्रत्यंचंस्रुचःप्रत्यंचंस
ग्रंथिंप्रत्युक्षेदिति। ततोबर्हिषांप्रदक्षिणंप्रत्यग्रंथिंकृत्वापूर्वाग्रंनिदधातीतिविधारणयप्रयोगो। अ
निशिष्टाःप्रोक्षणीर्नेनयतिदक्षिणायैश्रोणेरोनरायैश्रोणेःस्वधापितृभ्यइति। अत्रप्राचीनावीतंके
चिदिच्छंतितत्परिभाषाविरुद्धं। उदग्घ्रप्रोक्षणीनिधानं। द्वेधेविशेषः। अग्नेणात्मानमुदीचीमुदूहतीति
बौधायनोजघनेनात्मानमुदीचीमुदग्घ्रोक्षतीतिवाजसनेयकिरिति। बर्हिर्विस्रस्यपुरस्तात्स्रुवंगृह्णातीति
ष्णोरिति। पुरस्तात्पूर्वदिग्गाभिमुख्येन। तस्मिन्पवित्रेअपिसृजतियजमानइतितूष्णींवेति। तंयजमा
नायब्रह्मणेप्रयच्छति। अथैनानिबर्हिः सन्नहनन्यायानयतिदक्षिणायैश्रोणेरोनरादृंहतीति

बहुवचनात् विस्रस्यास्तरणमितिविधारण्याः। ममतुश्चुल्वस्यायतनइतिसूत्रंबोधायनस्यश्चुल्वं
विस्रस्यदक्षिणेवेद्यंतेस्तृणीयादितिशाखीकिरितिद्वैधात्याक्षिकंविस्रंसनंभाति। दक्षिणेवेद्यंतेस्त
रणमेवाभ्यलायनादवगुण्यं। अथदक्षिणेवेद्यंतेबर्हिर्मुष्टिंस्तृणानिदेवबर्हिरिति। दक्षिणेवेद्यंतेस्तरणमु
पक्रम्योत्तराद्वेद्यंनास्तृणातीत्यर्थः। प्रतिमुष्टिमंत्रादृत्तिः। नांबहुलंपुरस्तात्सनीचीविवृतमननिश्चर्मस्त
णानि। प्राचीमुपक्रम्यप्रत्यगपवर्गंस्तरणवती। अत्रप्रतिमुष्टिमुल्यंतरायैराछादनंगम्यते। महापित्र
तीभनाछादनविधानात्। प्रत्यगारभ्यस्तरणमितिशाखी किमतंदृक्मेवाभ्यलायनैः संकार्यं। स्परि
भाषान्नयुष्मास्तु। अस्मिन्मतेपि अयैर्मुष्टाछादनंकर्तव्यमेवेति। अथपत्नरपाणिः प्राङभिमुख्यप

रिधिन्यारदधातिगंधर्वइत्यादि। प्रागभिसर्पणंप्रस्तरग्रहणात्पुरस्तात्पश्चाद्वाभवतीतिविधारण्याः।
दक्षिणंमध्यमस्योपरिउत्तरंमध्यमस्याधस्तात्। अथवासंस्पृष्टानेवपरिदध्यादितिद्वैधार्थः। अथस्रु
र्येणपुरस्तादुपदधातिगंधर्वइत्यादि। प्रागभिसर्पणंप्रस्तरग्रहणात्पुरस्तात्पश्चाद्वाभवतीतिविधा
रण्यः दक्षिणंमध्यमस्योपरिउत्तरंमध्यमस्याधस्तात्। अथवासंस्पृष्टानेवपरिदध्यादितिद्वैधार्थः।
अथस्रुर्येणपुरस्तादुपदधातिस्रुर्यंस्तेनैतस्रुर्यंपुरस्तात्परिधिंमनसाकल्पयति। ऊर्ध्वंसमिधावादधा
तिवीतिहोत्रं॰ अधरइतिदक्षिणांतृणीमुत्तरामभ्याधायेति। ऊर्ध्वेऊर्ध्वाग्रे। ऊर्ध्वाग्रएवाद
धातिवाऊर्ध्वाग्रेप्रथमंनिधायपश्चात्त्रागग्रेनिपातयेदितिद्वैधार्थः। अत्रयाजमानेपरिधी

न्परिधीयमानाननुमंत्रयतेध्रुवोसीत्यादि। अथाग्निंयोगेनयुनक्तियुनज्मीति। समिधोर
भ्याधीयमानयोर्जपंतांधानास्त्विति। परिधीयमानानित्युक्तेरभ्याधीयमानयोरित्युक्तेश्चपरि
धिसमिधांसमकालमनुमंत्रणं। अथांतर्वेद्युदक्चौत्रेविधृतीतिरश्चीसादयतिविशोयंत्रेस्थ
इति। मध्यमबर्हिर्मुष्टेःपरिभोजनीयेभ्योन्यतोवाविधृतीकार्येतिद्वैधार्थः। तत्रमध्यमपक्षकल्पा
नुगुणः। विधृत्योःप्रस्तरंवस्तूनामिति। अत्रापस्तंबः। अभिहुतानराणिप्रस्तरमूलानिबर्हिर्मूले
भ्यइति। प्रस्तरेजुहूंजुहूरसीति। उत्तरामुपभृतमुपभृदसीति। उत्तरांध्रुवांध्रुवासीति। अत्रसूत्र
द्वयेप्रस्तरइत्यनुवृत्तं। तेनप्रस्तरंविस्रस्यतस्मिन्नसंस्पृष्टस्रुचोसादनं। असंस्पृष्टास्रुचःप्र

स्तरेसादयतीत्यापस्तंबात्। अथवाजुहूमेवप्रस्तरेअधस्ताद्विधृत्योरुपभृतंविधृत्योरुपरिध्रु
वामितिकल्पांतरे। ईषत्त्यगवकृष्टामिवोपभृतंसर्वाःसमानशिरस्का वेतिद्वैधे। केचनोपभृ
दपेक्षयाप्रत्यगवकृष्टध्रुवामपिसादयंतितन्मूलंविमृश्यं। अथस्रुचःसन्नाअभिमृशेदेताअस
दन्नितिस्पृशन्सकृदेवजिघृक्षंतमभिमंत्रयेतेमंमंत्रपाठःसंस्पर्शसमकालिकइत्युक्तेः॥ विष्णु
निस्थेत्याज्यान्यभिमंत्रयते। बहुवचनात्स्थात्याज्यसहितानामाज्यानामभिमंत्रणं। अथादत्ते
दक्षिणेनाज्यस्थालीं सस्रुवां सज्येनपात्रेवेदमित्येनत्समादायपदक्षिणमाहृत्यप्रत्यङ्मुत्यज
घनेनगार्हपत्यमुपविश्यपात्र्यांद्वैधोपस्तृणीतेस्योनंतदितिहविषांपश्चादुदगायनंपात्रेनिद

स्रुचः

